Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ धूमावतीमन्त्रः —

नृसिंह ऋषिः । पङ्क्तिः छन्दः । ज्येष्ठादेवी देवता । धूं बीजम् । स्वाहा शक्तिः । निग्रहे० । धूं इत्यादिना षडङ्गम् ॥

ध्यायेत्काळाभ्रनीलां विचलितरदनां काकनासाक्षिकण्ठां
संमार्जन्युल्कशूर्पैर्धृतमुसलकरां वक्रदन्तां पिपासाम् ।
ज्येष्ठां निर्वाणवेषां भ्रुकुटितनयनां मुक्तकेशामुदारां
शुष्कोत्तुङ्गातितिर्यक्स्तनभरयुगळां निष्कृपां शत्रुहन्त्रीम् ॥

धूं धूमावती(ति) स्वाहा । सप्तसहस्रजपः ॥

ऋतुकोणस्थवृत्तान्तः बीजं कोणे मनुं लिखेत् ।
कोणाग्रशूलके साध्यं ज्येष्ठायन्त्रमिहोच्यते ॥

संपूज्य विधिवद्यन्त्रं जपित्वा तु सहस्रकम् ।
श्मशाने तु निशामध्ये निखनेत् बलिपूर्वकम् ॥

रिपुगेहेऽथवा कुर्यात्खननं बलिवर्जितम् ।
भूयो जपेत्त्रिरात्रं तु तत्कालोचितदिङ्मुखः ॥

स्तम्भनोच्चाटने चैव निग्रहे चित्तविभ्रमे ।
सम्भक्षणे च विद्वेषे प्रकुर्यात्सावधानतः ।
अनात्माभिमुखीं ध्यात्वा गच्छन्तीं वैरिणं प्रति ॥

यो जपेन्निशि साहस्रं तस्य शत्रुर्विनश्यति ।
ताडयन्तीं महावेगं शूर्पेण रिपुवक्षसि ॥

ध्यात्वा जपेत्सहस्रं तु नष्टचित्तो भवेद्रिपुः ।
मार्जयन्तीं क्षणात् शत्रोः धनधान्यादिकं चिरम् ॥

ध्यात्वाष्टोत्तरसहस्रं जपेद्भाग्यक्षयाय च ।
दीप्यमानोल्ककेनैव दहन्तीं चापि वैरिणम् ॥

ध्यात्वा जपेत्तथा मन्त्रं स्तम्भनायाम्बिके बुधः ।
त्रिकोणं विलिखेत्पूर्वं तन्मध्ये बीजमालिखेत् ॥

कोणाग्रे तु लिखेच्छूलं तच्छूलान्तर्लिखेन्मनुम् ।
तदग्रे विलिखेत्साध्यं ज्येष्ठायन्त्रं वरानने ॥

संपूज्य विधिवद्यन्त्र निशामध्ये श्मशानके ।
बलिपूर्वं खनित्वा तु पुनः स्नात्वा जपेन्मनुम् ॥

अष्टोत्तराष्टसाहस्रं दृढचित्तोऽरिदिङ्मुखः ।
वैरिणः तत्क्षणादेव यान्ति वैवस्वतं पुरम् ॥

विद्वेषणे तथा देवि जपेदेकाग्रमानसः ।
अन्योन्यकलहं क्षिप्रं शत्रूणां जायते ध्रुवम् ॥

विलोमेन जपेनैव निवृत्तिस्स्यात्सहस्रशः ।
नान्यमन्त्रैः निवृत्तिः स्यात्प्रयत्नेपि कृतेम्बिके ॥

अथ प्रसङ्गात् कल्पान्तरोक्तो धूमावतीमन्त्रोप्यत्र लिख्यते—

क्षपण ऋषिः । आगच्छन्दः । श्मशानगामिनी देवता । यं बीजम् । रं शक्तिः । मारणोचाटविद्वेषणार्थे विनियोगः । यां इत्यादिना षडङ्गम् ॥

द्विभुजां कृष्णवर्णां च त्रिनेत्रां सर्पभूषणाम् ।
कपालशूलं दधतीं चिन्तयेच्चितिनामसीम् ॥

ओं यं रीं धू धूमावती(ति)ओरुच्चुडले गिरि गिरि अर्पल् अर्पल् विचर-कोण्डेन् कल्कन् नरम्बिनुळ्ळे अरण्डु अरण्डु इरुन्दु इरुन्दु कडुघ कडुघ निरिग निरिगप्पोह स्वाहा । इति मन्त्रः । अयुत जपेत् । सर्षपमिश्रित-चरुणा दशांश होमः । अथ प्रयोगा वक्ष्यन्ते—

प्रेतनामसि शत्रोराकृतिं विलिख्य धूमे अग्निधूमे स्वाहा, पादधूमे कालधूमे स्वाहा, हस्तयोर्धूमे स्वाहा, अन्तर्धूमे स्वाहा, नेत्रधूमे स्वाहा, मृत्युधूमे स्वाहा, श्रवणधूमे स्वाहा, अक्षिधूमे स्वाहा, नासिकाधूमे स्वाहा यमधूमे स्वाहा, लिङ्गधूमे स्वाहा, ज्वालाधूमे स्वाहा, धूमे धूमावती स्वाहा ॥

एतान्मन्त्रान् हृदये विलिख्य तीक्ष्णाग्रैः कण्टकैः पुनः ।
वेधयेल्लेपयेद्दुष्टविषैः पश्चात्तु तापयेत् ॥

संस्थाप्याथ च वल्मीके निखनेच्छत्रुमारणम् ।
भवेन्मण्डलतः पूर्वमुद्धृते मोक्ष एव हि ॥

तीक्ष्णकण्टक — काण्टे कोळसा ।

ग्रहधूमवह्निस्वरणलवणौपणहेमवारिभिर्मिलितैः ।
विषमतिभीषणमुक्तमहिताहितनिग्रहेषु हितम् ॥

अस्यार्थः — गृहधूम – ஒட்டடை घरवेसा । वह्नि – कोडिवेलि । लवण – मीठ - உப்பு ऊषणं - शुण्ठी, मिरे, पिप्पल्या - சுக்கு மிளகு திப்பிலி हेमवारि — सोनधोत्रचें रस — பொன்னூமத்தை இலைச்சாறு. एतानि

ने । यन्त्रम् —

सीसपट्टे लिखेद्यन्त्रं चतुष्षष्टिपदं ततः ।
चतुष्कोणेषु हुं शेषान्मन्त्रेणानेन पूरयेत् ॥

शूलाङ्कितं महायन्त्रं विषेण तु विलेपयेत् ।
कारस्करमये पत्रे निधाय निशि साधकः ॥

श्मशाने निखनेद्यन्त्रं शत्रूणां कुलनाशनम् ।

प्रयोगान्तरम् —

कारस्करस्य पत्रेष्वष्टविषेणैव चोररूपं हि ।
कृत्वा तु मन्त्रमेनं विलिखेद्गात्रेषु काकपक्षेण ॥

कारस्करं तु रूपं कृत्वा हृदि निक्षिपेच्च यन्त्रमिदम् ।
पश्चाद्भूमौ निखनेत्तदुपर्यथ वह्निमाशु संपूज्य ॥

कारस्करस्य समिधां जुहुयात्सम्यक् त्रिसाहस्रम् ।
भूयाच्छत्रुविनाशस्तेन तथा चोद्धृते मोक्षः ॥

यन्त्रान्तरम् —

चतुष्पथाच्च वल्मीकात् कुम्भकाराच्च मृत्तिकाम् ।
निर्गुण्डीं च तथा चाष्टविषमादाय बुद्धिमान् ॥

कनकस्य रसे सम्यक् पेषयेच्छवकर्परे ।
यन्त्रं विरचयेन्मन्त्री त्रिकोणं मध्यतस्सुधीः ॥
तद्बहिर्द्वादशदळं बहिर्वायुपुरत्रयम् ।
तद्बहिश्चतुरश्रं स्याद(चाप्य)ष्टशूलान्समालिखेत् ।
त्रिकोणे च लिखेच्चोरमारणं कुरु कुर्विति ॥

स्वाहान्तं षट्सु कोणेषु तथा धूमावतीं द्विठाम् ।
दळद्वादशके मूलमन्त्रार्णान् शरसंख्यया ॥

विभज्य विलिखेद्भूयो वायुगेहे हुताशनम् ।
चतुष्कोणेषु हुंकारं शूलरन्ध्रे फडित्यपि ॥

लिखित्वैवं यन्त्रमिदं मन्त्रं जप्त्वा सहस्रकम् ।
कुजवारे तु मन्दांशे श्मशाने निखनेत्सुधीः ॥

चोराणां मारणं चाशु भवेन्मोक्षस्तदुध्दृतौ ।

वायुपुरत्रयं षट्कोणत्रयम् । कनक–सोनधोता । பொன்னூமத்தை
निर्गुण्डी–निर्गुडी–நொச்சில் द्विठान्तं–स्वाहान्तम् ।

प्रयोगान्तरम् —

कारस्करमयं कीलं सप्तांगुलमनुत्तमम् ।
अयुतं साधितं कृत्वा शत्रुनामविदर्भितम् ॥

शत्रूणां गृहमध्ये तु निखनेद्गुलिकोदये ।
उच्चाटनं भवेत्तेषां कुलं चैव विनश्यति ॥

प्रयोगान्तरम् —

सप्तांगुलमितं कीलमुन्मत्तस्य तु साधयेत् ।
अष्टोत्तरसहस्रं तु शत्रुनाम विदर्भितम् ॥

शत्रूणां दक्षिणे पादे खनेन्मत्तो भविष्यति ।
[1] स्वातीनामर्जुनं कीलं स्वसप्तांगुलमानतः ॥

अष्टोत्तरशतं जप्त्वा शत्रोः पद्धूळिमिश्रितम् ।
श्मशाने निखनेच्छत्तोरष्टमे राशिके यदि ॥

मासेन मृत्युस्तस्य स्याद्यदि नोध्द्रियते ततः ।
वैकङ्कतं विशाखायां कीलकं तु दशांगुलम् ॥

दशाभिमन्त्रितं कृत्वा शत्रुमूत्रे खनेद्यदि ।
मूत्रस्तम्भो भवेत्तद्वन्नास्ति नास्ति प्रतिक्रिया ॥

---

१. स्वातिभे त्वर्जुनं इति शोधिते सुगमार्थः स्यादिति भाति ।

२. ह्रींकार क्षंकारयोर्मध्ये ळंकारो न दृश्यते ङ मातृकायाम् ।